कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥ अथ तृतीय काण्डे तृतीयः प्रश्नः॥

हरिः ओम्॥ अग्ने तेजस्विन्तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु दीक्षायै च त्वा तपसश्च तेजसे जुहोमि तेजोविदसि तेजो मा मा हासीन्माऽहं तेजो हासिषं मा मां तेजो हासीदिन्द्रौजस्विन्नोजस्वी त्वं देवेषु भूया ओजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु ब्रह्मणश्च त्वा क्षत्रस्य चौ-
[१] जसे जुहोम्योजोविदस्योजो मा मा हासीन्माऽहमोजो हासिषं मा मामोजो हासीथ्सूर्य भ्राजस्विन्भ्राजस्वी त्वं देवेषु भूया भ्राजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु वायोश्च त्वाऽपाञ्च भ्राजसे जुहोमि सुवर्विदसि सुवर्मा मा हासीन्माहगं् सुवर्हासिषं मा मागं् सुवर्हासीन्मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु॥[२]

क्षत्रस्य च मयि त्रयोविगं्शतिश्च॥3.3.1॥

वायुर्हिंकर्ताऽग्निः प्रस्तोता प्रजापतिः साम बृहस्पतिरुद्गाता विश्वे देवा उपगातारो मरुतः प्रतिहर्तार इन्द्रो निधनं ते देवाः प्राणभृतः प्राणं मयि दधत्वेतद्वै सर्वमध्वर्युरुपाकुर्वन्नुद्गातृभ्य उपाकरोति ते देवाः प्राणभृतः प्राणं मयि दधत्वित्याहैतदेव सर्वमात्मन्धत्त इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि

शग्ंसिषद्विश्वे देवाः [३] सूक्तवाचः पृथिवि मातर्मा मा हिग्ंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासग्ं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनु मदन्तु॥[४]

शग्ंसिषद्विश्वे देवा अष्टाविग्ंशतिश्च||3.3.2||

वसवस्त्वा प्र बृहन्तु गायत्रेण छन्दसाऽग्नेः प्रियं पाथ उपेहि रुद्रास्त्वा प्र बृहन्तु त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथ उपेह्यादित्यास्त्वा प्र बृहन्तु जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथ उपेहि मान्दासु ते शुक्र शुक्रमा धूनोमि भन्दनासु कोतनासु नूतनासु रेशीषु मेषीषु वाशीषु विश्वभृथ्सु माध्वीषु ककुहासु शाक्वरीषु[५] शुक्रासु ते शुक्र शुक्रमा धूनोमि शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः। आऽस्मिन्नुग्रा अचुच्यवुर्दिवो धारा असश्चत॥ ककुहग्ं रूपं वृषभस्य रोचते बृहथ्सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः। यत्ते सोमाऽदाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहोशिक्त्वं देव सोम गायत्रेण छन्दसाऽग्नेः [६] प्रियं पाथो अपीहि वशी त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथो अपीह्यस्मथ्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथो अपीह्या नः प्राण एतु परावत आऽन्तरिक्षाद्दिवस्परि। आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा। इन्द्राग्नी मे वर्चः कृणुतां वर्चः सोमो बृहस्पतिः। वर्चो मे विश्वे देवा वर्चो मे धत्तमश्विना॥ दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत्। परि विश्वानि काव्या नेमिश्चक्रमिवाभवत्॥[७]

शाक्वरीष्वग्नेर्बृहस्पतिः पञ्चविग्ंशतिश्च||3.3.3||

एतद्वा अपां नामधेयं गुह्यं यदाधावा मान्दासु ते शुक्र शुक्रमा धूनोमीत्याहाऽपामेव नामधेयेन गुह्येन दिवो वृष्टिमव रुन्धे शुक्रं ते शुक्रेण गृह्णामीत्याहैतद्वा अह्नो रूपं यद्रात्रिः सूर्यस्य रश्मयो वृष्ट्या ईशतेऽह्न एव रूपेण सूर्यस्य रश्मिभिर्दिवो वृष्टिं च्यावयत्याऽस्मिन्नुग्रा [८] अचुच्यवुरित्याह यथायजुरेवैतत्ककुहग्ं रूपं वृषभस्य रोचते बृहदित्याहैतद्वा अस्य ककुहग्ं रूपं यद्वृष्टी रूपेणैव वृष्टिमव रुन्धे यत्ते सोमाऽदाभ्यं नाम जागृवीत्याहैष ह वै हविषा हविर्यजति योऽदाभ्यं गृहीत्वा सोमाय जुहोति परा वा एतस्याऽयुः प्राण एति [९] योऽग्ंशुं गृह्णात्या नः प्राण एतु परावत इत्याहाऽऽयुरेव प्राणमात्मन्धत्तेऽमृतमसि प्राणाय त्वेति हिरण्यमभि व्यनित्यमृतं वै हिरण्यमायुः प्राणोऽमृतेनैवाऽयुरात्मन्धत्ते शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यप उप स्पृशति भेषजं वा आपो भेषजमेव कुरुते॥[१०]

उग्रा एत्यापस्त्रीणि च‖***3.3.4***‖

वायुरसि प्राणो नाम सवितुराधिपत्येऽपानं मे दाश्चक्षुरसि श्रोत्रं नाम धातुराधिपत्य आयुर्मे दा रूपमसि वर्णो नाम बृहस्पतेराधिपत्ये प्रजां मे दा ऋतमसि सत्यं नामेन्द्रस्याऽधिपत्ये क्षत्रं मे दा भूतमसि भव्यं नाम पितृणामाधिपत्येऽपामोषधीनां गर्भं धा ऋतस्य त्वा व्योमन ऋतस्य त्वा [११] विभूमन ऋतस्य त्वा विधर्मण ऋतस्य त्वा सत्यायर्तस्य त्वा ज्योतिषे प्रजापतिर्विराजमपश्यत्तया भूतं च भव्यं चाऽसृजत तामृषिभ्यस्तिरोऽदधात्तां जमदग्निस्तपसाऽपश्यत्तया वै स पृश्नीन्कामानसृजत तत्पृश्नीनां पृश्नित्वं यत्पृश्नयो गृह्यन्ते पृश्नीनेव तैः कामान् यजमानोऽव रुन्धे

वायुरसि प्राणो [१२] नामेत्याह प्राणापानावेवाऽव रुन्धे चक्षुरसि श्रोत्रं नामेत्याहाऽऽयुरेवाऽव रुन्धे रूपमसि वर्णो नामेत्याह प्रजामेवाऽव रुन्ध ऋतमसि सत्यं नामेत्याह क्षत्रमेवाऽव रुन्धे भूतमसि भव्यं नामेत्याह पशवो वा अपामोषधीनां गर्भः पशूनेवा- [१३] ऽव रुन्ध एतावद्वै पुरुषं परितस्तदेवाऽव रुन्ध ऋतस्य त्वा व्योमन इत्याहेयं वा ऋतस्य व्योमेमामेवाभि जयत्यृतस्य त्वा विभूमन इत्याहान्तरिक्षं वा ऋतस्य विभूमाऽन्तरिक्षमेवाऽभि जयत्यृतस्य त्वा विधर्मण इत्याऽह द्यौर्वा ऋतस्य विधर्म दिवमेवाऽभि जयत्यृतस्य [१४] त्वा सत्यायेत्याह दिशो वा ऋतस्यसत्यं दिश एवाऽभि जयत्यृतस्य त्वा ज्योतिष इत्याह सुवर्गो वै लोक ऋतस्य ज्योतिः सुवर्गमेव लोकमभि जयत्येतावन्तो वै देवलोकास्तानेवाऽभि जयति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराज्येवाऽन्नाद्ये प्रति तिष्ठति॥[१५]

*व्योमन ऋतस्य प्राणः पशूनेव विधर्म दिवमेवाऽभि जयत्यृतस्य षट्चत्वारिग्ंशच्च॥**3.3.5***॥

देवा वै यद्यज्ञेन नाऽवारुन्धत तत्परैरवाऽरुन्धत तत्पराणां परत्वं यत्परे गृह्यन्ते यदेव यज्ञेन नाऽवरुन्धे तस्याऽवरुद्ध्यै यं प्रथमं गृह्णातीममेव तेन लोकमभि जयति यं द्वितीयमन्तरिक्षं तेन यं तृतीयममुमेव तेन लोकमभि जयति यदेते गृह्यन्त एषां लोकानामभिजित्या [१६] उत्तरेष्वहः स्वमुतोऽर्वाञ्चो गृह्यन्तेऽभिजित्यैवेमाँल्लोकान्पुनरिमं लोकं प्रत्यवरोहन्ति यत्पूर्वेष्वहः स्वितः पराञ्चो गृह्यन्ते तस्मादितः पराञ्च इमे लोका यदुत्तरेष्वहः स्वमुतोऽर्वाञ्चो गृह्यन्ते तस्मादमुतोऽर्वाञ्च इमे लोकास्तस्मादयातयाम्नो लोकान्मनुष्या उप जीवन्ति ब्रह्मवादिनो वदन्ति कस्माथ्सत्याददभ्य ओषधयः सं भवन्त्योषधयो [१७]

मनुष्याणामन्नं प्रजापतिं प्रजा अनु प्र जायन्त इति परानन्विति ब्रूयाद्यद्गृह्णात्यद्भ्यस्त्वौषधीभ्यो गृह्णामीति तस्माददद्भ्य ओषधयः सं भवन्ति यद्गृह्णात्योषधीभ्यस्त्वा प्रजाभ्यो गृह्णामीति तस्मादोषधयो मनुष्याणामन्नं यद्गृह्णाति प्रजाभ्यस्त्वा प्रजापतये गृह्णामीति तस्मात्प्रजापतिं प्रजा अनु प्र जायन्ते॥[१८]

अभिजित्यै भवन्त्योषधयोऽष्टाचत्वारिगं्शच्च ||3.3.6||

प्रजापतिर्देवासुरानसृजत तदनु यज्ञोऽसृज्यत यज्ञं छन्दागं्सि ते विष्वञ्चो व्यक्रामन्थ्सोऽसुरानु यज्ञोऽपाऽक्रामद्यज्ञं छन्दागं्सि ते देवा अमन्यन्ताऽमी वा इदमभूवन् यद्वयग्ग् स्म इति ते प्रजापतिमुपाऽधावन्थ्सोऽब्रवीत्प्रजापतिश्छन्दसां वीर्यमादाय तद्वः प्र दास्यामीति स छन्दसां वीर्य- [१९] मादाय तदेभ्यः प्राऽयच्छत्तदनु छन्दाग्स्यपाऽक्रामङ्छन्दागं्सि यज्ञस्ततो देवा अभवन्पराऽसुरा य एवं छन्दसां वीर्यं वेदाऽऽ श्रावयाऽस्तु श्रौषड्यज ये यजामहे वषट्कारो भवत्यात्मना पराऽस्य भ्रातृव्यो भवति ब्रह्मवादिनो वदन्ति कस्मै कमध्वर्युरा श्रावयतीति छन्दसां वीर्यायेति ब्रूयादेतद्वै [२०] छन्दसां वीर्यमा श्रावयाऽस्तु श्रौषड्यज ये यजामहे वषट्कारो य एवं वेद सवीर्यैरेव छन्दोभिरर्चति यत्किञ्चाऽर्चति यदिन्द्रो वृत्रमहन्नमेध्यं तद्यद्यतीनपावपदमेध्यं तदथ कस्मादैन्द्रो यज्ञ आ सग्ग्स्थातोरित्याहुरिन्द्रस्य वा एषा यज्ञिया तनूर्यद्यज्ञस्तामेव तद्यजन्ति य एवं वेदोपैनं यज्ञो नमति॥[२१]

छन्दसां वीर्यं वा एव तदष्टौ च||3.3.7||

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमम्॥ आ वृश्च्यते वा एतद्यजमानोऽग्निभ्यां यदेनयोः शृतंकृत्याऽथाऽन्यत्राऽवभृथमवैत्यायुर्दा अग्ने हविषो जुषाण इत्यवभृथमवैष्यञ्जुहुयादाहुत्यैवैनौ शमयति नाऽऽर्तिमार्छति यजमानो यत्कुसीद- [२१] मप्रतीत्तं मयि येन यमस्य बलिना चरामि। इहैव सन्निरवदये तदेतत्तदग्ने अनृणो भवामि। विश्वलोप विश्वदावस्य त्वाऽऽसञ्जुहोम्यग्धादेकोऽहुतादेकः समसनादेकः। ते नः कृण्वन्तु भेषजगं् सदः सहो वरेण्यम्॥ अयं नो नभसा पुरः सग्ग्स्कानो अभि रक्षतु। गृहाणामसमत्यै बहवो नो गृहा असन्न्॥ स त्वं नो [२३] नभसस्पत ऊर्जं नो धेहि भद्रया। पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि॥ देव सग्ग्स्कान सहस्रपोषस्येशिषे स नो रास्वाज्यानिगं् रायस्पोषगं् सुवीर्यगं् संवथ्सरीणाग् स्वस्तिम्॥ अग्निर्वाव यम इयं यमी कुसीदं वा एतद्यमस्य यजमान आ दत्ते यदोषधीभिर्वेदिग्ग् स्तृणाति यदनुपौष्य प्रयायाद्ग्रीवबद्धमेन- [२४] ममुष्मिँल्लोके नेनीयेरन् यत्कुसीदमप्रतीत्तं मयीत्युपौषतीहैव सन् यमं कुसीदं निरवदायाऽनृणः सुवर्गं लोकमेति यदि मिश्रमिव चरेदञ्जलिना सक्तून्प्रदाव्ये जुहुयादेष वा अग्निर्वैश्वानरो यत्प्रदाव्यः स एवैनग्ग् स्वदयत्यह्नां विधान्यामेकाष्टकायामपूपं चतुः शरावं पक्त्वा प्रातरेतेन कक्षमुपौषेद्यदि [२५] दहति पुण्यसमं भवति यदि न दहति पापसममेतेन ह स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्त्रमुप यन्ति यो वा उपद्रष्टारमुपश्रोतारमनुख्यातारं विद्वान्यजते सममुष्मिँल्लोक इष्टापूर्तेन गच्छतेऽग्निर्वा उपद्रष्टा वायुरुपश्रोताऽऽदित्योऽनुख्याता तान् य एवं विद्वान् यजते सममुष्मिँल्लोक इष्टापूर्तेन गच्छतेऽयं नो नभसा पुर [२६]

इत्याहाऽग्निर्वै नभसा पुरोऽग्निमेव तदाहैतन्मे गोपायेति स त्वं नो नभसस्पत इत्याह वायुर्वै नभसस्पतिर्वायुमेव तदाहैतन्मे गोपायेति देव सग्ग्स्फानेत्याहासौ वा आदित्यो देवः सग्ग्स्फान आदित्यमेव तदाहैतन्मे गोपायेति॥[२७]

कुसीदं त्वं न एनमोषेद्यदि पुर आदित्यमेव तदाहैतन्मे गोपायेति||3.3.8||

एतं युवानं परि वो ददामि तेन क्रीडन्तीश्चरत प्रियेण। मा नः शाप्त जनुषा सुभागा रायस्पोषेण समिषा मदेम॥ नमो महिम्न उत चक्षुषे ते मरुतां पितस्तदहं गृणामि। अनु मन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यम्॥ देवानामेष उपनाह आसीदपां गर्भ ओषधीषु न्यक्तः। सोमस्य द्रप्समवृणीत पूषा [२८] बृहन्नद्रिरभवत्तदेषाम्॥ पिता वथ्सानां पतिरघ्नियानामथो पिता महतां गर्गराणाम्। वथ्सो जरायु प्रतिधुक्पीयूष आमिक्षा मस्तु घृतमस्य रेतः॥ त्वां गावोऽवृणत राज्याय त्वाग्ं हवन्त मरुतः स्वर्काः। वर्ष्मन् क्षत्रस्य ककुभि शिश्रियाणस्ततो न उग्रो वि भजा वसूनि॥ व्यृद्धेन वा एष पशुना यजते यस्यैतानि न क्रियन्त एष ह त्वै समृद्धेन यजते यस्यैतानि क्रियन्ते॥[२९]

पूषा क्रियन्त एषोऽष्टौच||3.3.9||

सूर्यो देवो दिविषद्भ्यो धाता क्षत्राय वायुः प्रजाभ्यः। बृहस्पतिस्त्वा प्रजापतये ज्योतिष्मतीं जुहोतु॥ यस्यास्ते हरितो गर्भोऽथो योनिर्हिरण्ययी। अङ्गान्यहुता यस्यै तां देवैः समजीगमम्॥ आ वर्तन वर्तय नि निवर्तन वर्तयेन्द्र नर्दबुद। भूम्याश्चतस्रः प्रदिशस्ताभिरा वर्तया पुनः॥ वि ते भिनद्मि तकरीं वि योनिं वि गवीन्यौ। वि [३०]

मातरं च पुत्रं च वि गर्भं च जरायु च। बहिस्ते अस्तु बालिति। उरुद्रप्सो विश्वरूप इन्दुः पवमानो धीर आनञ्ज गर्भम्॥ एकपदी द्विपदी त्रिपदी चतुष्पदी पञ्चपदी षट्पदी सप्तपद्यष्टापदी भुवनाऽनु प्रथताग् स्वाहा। मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः॥[३१]

गवीन्यौ विचतुश्चत्वारिग्ंशच्च॥3.3.10॥

इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती। उक्थं मदश्च शस्यते॥ अयं वां परि षिच्यते सोम इन्द्राबृहस्पती। चारुर्मदाय पीतये॥ अस्मे इन्द्राबृहस्पती रयिं धत्तग्ं शतग्विनम्। अश्वावन्तग्ं सहस्रिणम्॥ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः। इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु॥ वि ते विष्वग्वातजूतासो अग्ने भामासः [३२] शुचे शुचयश्चरन्ति। तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः॥ त्वामग्ने मानुषीरीडते विशो होत्राविदं विविचिग्ं रत्नधातमम्। गुहा सन्तग्ं सुभग विश्वदर्शतं तुविष्मणसग्ं सुयजं घृतश्रियम्॥ धाता ददातु नो रयिमीशानो जगतस्पतिः। स नः पूर्णेन वावनत्॥ धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवनं जजान। धाता पुत्रं यजमानाय दाता [३३] तस्मा उ हव्यं घृतवद्विधेम॥ धाता ददातु नो रयिं प्राचीं जीवातुमक्षिताम्। वयं देवस्य धीमहि सुमतिग्ं सत्यराधसः॥ धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरोणे। तस्मै देवा अमृताः सं व्ययन्तां विश्वे देवासो अदितिः सजोषाः॥ अनु नोऽद्याऽनुमतिर्यज्ञं देवेषु मन्यताम्। अग्निश्च हव्यवाहनो भवतां दाशुषे मयः॥ अन्विदनुमते त्वं [३४] मन्यासै शं च नः कृधि। क्रत्वे दक्षाय

नो हिनु प्र ण आयूग्ंषि तारिषः॥ अनु मन्यतामनुमन्यमाना प्रजावन्तग्ं रयिमक्षीयमाणम्। तस्यै वयग्ं हेडसि माऽपि भूम सा नो देवी सुहवा शर्म यच्छतु॥ यस्यामिदं प्रदिशि यद्विरोचतेऽनुमतिं प्रति भूषन्त्यायवः। यस्या उपस्थ उर्वन्तरिक्षग्ं सा नो देवी सुहवा शर्म यच्छतु [३५] राकामहग्ं सुहवाग्ं सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना। सीव्यत्वपः सूच्याऽच्छिद्यमानया ददातु वीरग्ं शतदायमुक्थ्यम्॥ यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि। ताभिर्नो अद्य सुमना उपागहि सहस्रपोषग्ं सुभगे रराणा॥ सिनीवालिया सुपाणिः॥ कुहूमहग्ं सुभगां विद्मनापसमस्मिन् यज्ञे सुहवां जोहवीमि। सा नो ददातु श्रवणं पितृणां तस्यास्ते देवि हविषा विधेम॥ कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषश्चिकेतु। सं दाशुषे किरतु भूरि वामग्ं रायस्पोषं चिकितुषे दधातु॥[३६]

*भामासो दाता त्वमन्तरिक्षग्ं सा नो देवी सुहवा शर्म यच्छतु श्रवणं चतुर्विग्ंशतिश्च॥**3.3.11***॥

*अग्ने तेजस्विन्वायुर्वसवस्त्वैतद्वा अपां नामधेयं नायुरसि प्राणो नाम देवा वै यद्यज्ञेन न प्रजापतिर्देवासुरानायुर्दा एतं युवानग्ं सूर्यो देव इदंवामेकादश॥**11***॥*

अग्ने तेजस्विन्वायुरसि छन्दसां वीर्यं मातरंच षट्रिग्ंशत्॥३६॥

अग्ने तेजस्विञ्चिकितुषे दधातु॥

॥ हरिः ओम्॥

॥ श्री कृष्णार्पणमस्तु॥

॥ इति तृतीयकाण्डे तृतीयः प्रश्नः॥